श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते दशमस्कन्धे

# ॥ गोपिका गीतम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ गोपिका गीतम् ॥

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शाश्वदत्र हि।
दयित दृश्यतां दिक्षु तावकाः त्वयि धृतासवस्त्वां विचिन्वते ॥ 1 ॥

शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा।
सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ॥ 2 ॥

विषजलाप्ययात् व्यालराक्षसात् वर्षमारुतात् वैद्युतानलात्।
वृषमयात्मजात् विश्वतो भयात् ऋषभ ते वयं रक्षिता मुहुः ॥ 3 ॥

न खलु गोपिका नन्दनो भवान् अखिलदेहिनाम् अन्तरात्मदृक्।
विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले ॥ 4 ॥

विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात्।
करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ 5 ॥

व्रजजनार्तिहन् वीर योषितां निजजनस्मय ध्वंसनस्मित।
भज सखे भवत् किंकरीः स्म नो जलरुहाननं चारु दर्शय ॥ 6 ॥

प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम्।
फणिफणार्पितं ते पदांबुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ 7 ॥

मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण।
विधिकरीरिमा वीर मुह्यतीः अधरशीधुनाऽऽप्याययस्व नः ॥ 8 ॥

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥ 9 ॥

प्रहसितं प्रिय प्रेम वीक्षणं विहरणं च ते ध्यानमङ्गलम्।
रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि॥ **10**॥

चलसि यद्व्रजात् चारयन् पशून् नलिनसुन्दरं नाथ ते पदम्।
शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति॥ **11**॥

दिनपरिक्षये नीलकुन्तलैः वनरुहाननं बिभ्रदावृतम्।
घनरजस्वलं दर्शयन्मुहुः मनसि नः स्मरं वीर यच्छसि॥ **12**॥

प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि।
चरणपङ्कजं शन्तमञ्च ते रमण नः स्तनेष्वर्पयाधिहन्॥ **13**॥

सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम्।
इतररागवि स्मारणं नृणां वितर वीर नस्तेऽधरामृतम्॥ **14**॥

अटति यद्भवान् अह्नि काननं त्रुटिर्युगायते त्वामपश्यताम्।
कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशाम्॥ **15**॥

पतिसुतान्वय भ्रातृबान्धवान् अतिविलङ्घ्य तेऽन्त्यच्युतागताः।
गतिविदस्तवोत् गीतमोहिताः कितव योषितः कस्त्यजेन्निशि॥ **16**॥

रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम्।
बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः॥ **17**॥

व्रजवनौकसां व्यक्तिरङ्ग ते
    वृजिनहन्त्र्यलं विश्वमङ्गलम्।
त्यज मनाक् च नस्त्वत्स्पृहात्मनां
    स्वजनहृद्रुजां यन्निषूदनम्॥ **18**॥

यत्ते सुजात चरणाम्बुरुहं स्तनेषु
    भीताः शनैः प्रिय दधीमहि कर्कशेषु।

तेनाटवीमटसि तद्व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः॥ 19 ॥

॥ इति गोपिका गीतं समाप्तम्॥